योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १०१

एकाधिकशततमः सर्गः १०१

श्रीवसिष्ठ उवाच ।

चिन्मात्रमेव पुरुषस्तदेवेत्थमवस्थितम् ।

चिन्मात्रव्यतिरेकेण किमन्यदुपपद्यते ।। १

तच्चावदातमाकाशं तन्मये द्रष्टृ दृश्यते ।

तावन्मात्रं जगदतो हेयोपादेयधीः कुतः ।। २

न विद्यते परो लोको बार्हस्पत्यस्य यस्य तु ।

विदोऽन्यत्तस्य किं सारं रागद्वेषावतः कुतः ।। ३

इष्टानिष्टदृशो रागद्वेषदोषाः किमात्मकाः ।

संविद्व्योममये स्वप्ने जगदाख्येऽङ्ग कथ्यताम् ।। ४

इदं हेयमुपादेयं वेति संवित्खमात्मनि ।

निर्मले निर्मलं भाति केवात्र तदतद्दृशौ ।। ५

संविन्नरोऽमरो नागः संवित्स्थावरजंगमम् ।

भावाभावादयोऽस्याब्धेस्तरङ्गावर्तवृत्तयः ।। ६

संविदाकाशमेवाहं भवानपि जना अपि ।

म्रियामहे नो कदाचित्संवित्किल कदा मृता ।। ७

संविदो नास्ति संवेद्यं स्वयं संवेद्यतामिता ।

चित्त्वादतो विशालाक्ष द्वितैकत्वे क्व वा स्थिते ।। ८

संविन्मात्रादृते तस्माद्भूतं किमिव कथ्यताम् ।

कथ्यतां म्रियते तच्चेत्तदद्येमे कुतो वयम् ।। ९

वादिनः सौगताद्या ये ये लोकायतिकादयः ।

संविदाकाशमुत्सृज्य यन्मन्यन्ते तदुच्यताम् ।। १०

संविदाकाशमेवैतत्केनचिद्ब्रह्म कथ्यते ।

केनचित्प्रोच्यते ज्ञानं केनचिच्छून्यमुच्यते ।। ११

केनचिन्मदशक्त्याभं केनचित्पुरुषाभिधम् ।

केनचिच्च चिदाकाशं शिव आत्मा च केनचित् ।। १२

चिन्मात्रमेवमप्युक्तं याति न क्वचिदन्यताम् ।

यस्मात्स्वयं तदेवैवमात्मानं वेत्ति नेतरत् ।। १३

चूर्णतां यान्तु मेऽङ्गानि सन्तु मेरूपमानि च ।

का क्षतिः का च वा वृद्धिश्चिद्रूपवपुषो मम ।। १४

मृताः पितामहाद्याश्चिन्न मृता सा म्रियेत चेत् ।

तज्जन्म नैव नाम स्यादस्माकं मृतसंविदाम् ।। १५

न जायते न म्रियते संविदाकाशमक्षयम् ।

भवेत्कथं कथय किं किलाकाशस्य संक्षयः ।। १६

जगद्रूपैककचनमविनाशि चिदम्बरम् ।

उदयास्तमयोन्मुक्तं स्थितमात्मनि केवलम् ।। १७

जगद्भानं दधद्दाहं चिन्नभःस्फटिकाचलः ।

अनादिमध्यपर्यन्तः स्वच्छ आत्मनि तिष्ठति ।। १८

यथा यथान्धकारेण प्रेक्ष्यमाणं प्रणश्यति ।

किमप्यङ्गाभ्रचक्राभं तथेदं विश्वमात्मनि ।। १९

यथाम्बुधिः स्वयं याति तोयाद्यावर्तकादिकम् ।

स्थितो दधत्तथैवेदं चिदाकाशोऽङ्गमात्मनि ।। २०

चिन्मात्रमेव पुरुषः खवत्स च न नश्यति ।

कदाचनापि तद्व्यर्थं यन्नश्यामीति शोकिता ।। २१

देहाद्देहान्तरप्राप्तौ नव एव महोत्सवः ।

मरणात्मनि किं मूढा हर्षस्थाने विषीदथ ।। २२

मृतश्चेन्न भवेद्भूयः सोऽत्राप्युपचयो महान् ।

भावाभावग्रहोत्सर्गज्वरः प्रशममागतः ।। २३

मरणं जीवितं तस्मान्न दुःखं न सुखं यतः ।

नास्त्येवैतच्चिदाकाशः किलेत्थमभिजृम्भते ।। २४

मृतस्य देहलाभश्चेन्नव एव तदुत्सवः ।

मृतिर्नाशो हि देहस्य सा मृतिः परमं सुखम् ।। २५

मृतिरत्यन्तनाशश्चेत्तद्भवामयसंक्षयः ।

भूयः शरीरलाभश्चेन्नव एव तदुत्सवः ।। २६

कुकर्मभ्योऽथ भीतिश्चेत्सा समेह परत्र च ।

तानि मा कार्ष भोस्तस्माल्लोकद्वितयसिद्धये ।। २७

मरिष्यामि मरिष्यामि मरिष्यामीति भाषसे ।

भविष्यामि भविष्यामि भविष्यामीति नेक्षसे ।। २८

क्व नाम जन्ममरणे क्व भवाभवभूमयः ।

संविदात्मकमेवेदं व्योम व्योम्नि विवर्तते ।। २९

संविदाकाशमात्रात्मा पिब भुंक्ष्वास्व निर्ममः ।

आकाशकोशकान्तस्य कुत इच्छोदयस्तव ।। ३०

स्वप्रवाहबलोद्युक्तदेशकालवशादितान् ।

भावान्भुङ्क्तेऽभयो भव्यः पावनान्पावनादपि ।। ३१

मध्यमध्यगतान्दोषान्देशकालवशोदितान्।

अनादृत्यान्तरेवास्ते सुप्तधीरवहेलयन् ।। ३२

न दुःखमेति मरणात्सुखमेति न जीवितात् ।

नाभिवाञ्छति न द्वेष्टि स तदास्ते विवासनः ।। ३३

मरणजीवितजन्मजरत्तृणा-

न्यविमृशन्विगतेच्छमवासनः ।

विदितवेद्य इहाज्ञ इवोदितो

वसति वीतभयस्त्वचलो यथा ।। ३४

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे उत्तरार्धे परमोपदेशो नामैकाधिकशततमः सर्गः

।। १०१ ।।